# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा –आचार्यद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ४ | |
| विषयः – वास्तुशास्त्रम् | (C.C.- 5.3.9. Old & New ) | गुणाः – ७० |
| दिनाङ्कः – १२/१०/२०१९ | सन्दर्भग्रन्थः समराङ्गणसूत्रधारः | समयः –०३.०० तः ६.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कस्यचित् एका कारिका सान्वयं व्याख्यात।** (५)

(१) लक्षणेनान्वितानेतान् कथयामो यथाविधि।
पुराणां भूषणार्थाय भुक्तिमुक्तिप्रदा नृणाम्॥

(२) हेमकूटमथब्रूमः शुभलक्षणसंयुतम्।
सर्वविद्याधरस्थानमाश्रयः स पिनाकिनः॥

**प्रश्नः २** रुचकप्रासादलक्षणं ग्रन्थाधारेण प्रदर्शयत। **(१०)**

**अथवा**

श्रीधरप्रासादलक्षणं सविस्तरं दर्शयत।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्य उपरि ससन्दर्भ व्याख्यां कुरुत।** (५)

(१) तिलकानां तथोच्छ्रायो विधातव्यो द्विभागिकः।
तिलकस्य शिरोघण्टां चैकसूत्रेण मापयेत्॥

(२) अस्यैव तु यदा भद्रं भागेनैकेन निर्गतम्।
भवेत् तदानीं प्रासादो नाम्ना भद्रविशालकः।

**प्रश्नः ४** चित्रकूटप्रासाद लक्षणं ग्रन्थाधारेण वर्णयत। **(१०)**

**अथवा**

प्रासादस्तवनं ग्रन्थोक्तदिशा प्रदर्शयत।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः एकाकारिका सान्वयं व्याख्यात।** (५)

(१) सन्ति यान्यानि पीठानि लक्ष्मभेदादनेकधा।
तेषां मध्ये प्रकृष्टत्वादेतत् पञ्चकमीरितम्॥

(२) स्तरप्रमाणं मकरं तद्वन्मकरपट्टिकाम्।
पुनश्च्छेदं स्तरं कुर्याद् वेदीबन्धस्ततः स्तरम्॥

**प्रश्नः ६** श्रीबन्धलक्षणं ग्रन्थाधारेण स्पष्टयत। (१०)

**अथवा**

एकभूमिकद्राविडप्रासादलक्षणं ग्रन्थाधारेण वर्णयत।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य उपरि ससन्दर्भं व्याख्यां कुरुत।** (५)

(१) सर्वे प्राग्ग्रीवसंयुक्ताः कर्तव्यास्तोरणान्विताः।
ऐष्टिकादारवा यद्वा शैलजा वाजनाकुलाः॥

(२) सुकाप्रासूरसेनश्च स्तम्भिकाकूटभक्तयः।
कार्या पूर्वोक्तमार्गेण विचित्रकर्मोपशोभिताः॥

**प्रश्नः ८** महापमलक्षणं सविस्तरं वर्णयत। (१०)

**अथवा**

मेरुप्रासादे द्वितीयभूमिविधिः ग्रन्थाधारेण दर्शयत।

**प्रश्नः ९ अधोलिखितेषु केषाश्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु।** (१०)

(१) मेर्वादिनागरप्रासादाः कति ?
(२) नन्द्यावर्तप्रासादस्य आकृतिः किदृशी ?
(३) विमानः इत्युक्ते किम् ?
(४) पद्मप्रासादः कस्य देवस्य प्रियप्रासादः ?
(५) किङ्णीकप्रासादः कति (भूमिकायुक्तः)
(६) प्रासादे चन्द्रशालायाः स्थानं कुत्र भवति ?
(७) सिद्धिःकामप्रासादनिर्माणे फलं किम् ?
(८) नन्दिवर्धनप्रासादे कति अण्डकानि सन्ति ?
(९) पीठभेदाः कति ?
(१०) हर्षणप्रासादे अलिन्दः भवति न वा ?
(११) कैलाशप्रासादः कस्य देवानां कृते करणीयम् ?
(१२) मर्मवेधे किं फलम् ?
(१३) रुचकादिः कति प्रासादाः सन्ति ?
(१४) गजप्रासादस्य आकृतिः किदृशी ?
(१५) मन्दिरप्रासादनिर्माणस्य फलं किम् ?

--००--